# अथ कृष्णाष्टकम्

पालयाच्युत पालयाजित पालय कमलालय ।
लीलया धृतभूधराम्बुरुहोदर स्वजनोदर ॥

मध्वमानसपद्मभानुसमं स्मरप्रतिमं स्मर ।
स्निग्धनिर्मलशीतकान्तिलसन्मुखं करुणोन्मुखम् ।
हृद्यकम्बुसमानकन्धरमक्षयं दुरितक्षयं
स्निग्धसंस्तुतरूप्यपीठकृतालयं हरिमालयम् ॥१॥

अङ्गदादिसुशोभिपाणियुगेन सङ्क्षुभितैनसं
तुङ्गमाल्यमणीन्द्रहारसरोरसं खलनीरसम् ।
मङ्गलप्रदमन्थदामविराजितं भजताजितं
तं गृणे वररूप्यपीठकृतालयं हरिमालयम् ॥२॥

पीनरम्यतनूदरं भज हे मनः शुभ हे मनः
स्वानुभावनिदर्शनाय दिशन्तमर्थिसुशन्तमम् ।
आनतोऽस्मि निजार्जुनप्रियसाधकं खलबाधकं
हीनतोज्झितरूप्यपीठकृतालयं हरिमालयम् ॥३॥

हैमकिङ्किणिमालिकारशनाञ्चितं तमवञ्चितं
कम्रकाञ्चनवस्त्रचित्रकटिं घनप्रभया घनम् ।

नम्रनागकरोपमोरुमनामयं शुभधीमयं
नौम्यहं वररूप्यपीठकृतालयं हरिमालयम् ॥४॥

वृत्तजानुमनोज्ञजङ्घममोहदं परमोहदं
रत्नकल्पनखत्विषा हृतहृत्तमस्ततिमुत्तमम् ।
प्रत्यहं रचितार्चनं रमया स्वयाऽऽगतया स्वयं
चित्त चिन्तय रूप्यपीठकृतालयं हरिमालयम् ॥५॥

चारुपादसरोजयुग्मरुचाऽमरोच्चयचामरो-
दारमूर्धजभानुमण्डलरञ्जकं कलिभञ्जकम् ।
वीरतोऽचितभूषणं वरनूपुरं स्वतनूपुरं
धारयात्मनि रूप्यपीठकृतालयं हरिमालयम् ॥६॥

शुष्कवादिमनोऽतिदूरतरागमोत्सवदागमं
सत्कवीन्द्रवचोविलासमहोदयं महितोदयम् ।
लक्षयामि यतीश्वरैः कृतपूजनं गुणभाजनं
धिक्कृतोपम रूप्यपीठकृतालयं हरिमालयम् ॥७॥

नारदप्रियमाविशाम्बुरुहेक्षणं निजरक्षणं
तारकोपमचारुदीपचयान्तरे गतचिन्त रे ।
धीर मानस पूर्णचन्द्रसमानमच्युतमानम
द्वारकोपम रूप्यपीठकृतालयं हरिमालयम् ॥८॥

रूप्यपीठकृतालयस्य हरेः प्रियं दुरिताप्रियं
तत्पदार्चकवादिराजयतीरितं गुणपूरितम् ।
गोप्यमष्टकमेतदुच्चमुदे ममास्त्विह निर्मम
प्राप्य शुद्धफलाय तत्र सुकोमलं हतधीमलम् ॥९॥

॥ इति श्रीवादिराजतीर्थविरचितं कृष्णाष्टकम् ॥